# ॥ वाल्मीकि रामायण॥

## ५ सुन्दरकाण्ड

### अध्याय १७

तस्मिन्नेव ततः काले राजपुत्री त्वनिन्दिता ।
रूपयौवनसम्पन्नं भूषणोत्तमभूषितम् ॥ १॥

ततो दृष्ट्वैव वैदेही रावणं राक्षसाधिपम् ।
प्रावेपत वरारोहा प्रवाते कदली यथा ॥ २॥

ऊरुभ्यामुदरं छाद्य बाहुभ्यां च पयोधरौ ।
उपविष्टा विशालाक्षी रुदन्ती वरवर्णिनी ॥ ३॥

दशग्रीवस्तु वैदेहीं रक्षितां राक्षसीगणैः ।
ददर्श दीनां दुःखार्तं नावं सन्नामिवार्णवे ॥ ४॥

असंवृतायामासीनां धरण्यां संशितव्रताम् ।
छिन्नां प्रपतितां भूमौ शाखामिव वनस्पतेः ।
मलमण्डनदिग्धाङ्गीं मण्डनार्हाममण्डिताम् ॥ ५॥

समीपं राजसिंहस्य रामस्य विदितात्मनः ।
सङ्कल्पहयसंयुक्तैर्यान्तीमिव मनोरथैः ॥ ६॥

शुष्यन्तीं रुदतीमेकां ध्यानशोकपरायणाम् ।
दुःखस्यान्तमपश्यन्तीं रामां राममनुव्रताम् ॥ ७॥

वेष्टमानामथाविष्टां पन्नगेन्द्रवधूम् इव ।
धूप्यमानां ग्रहेणेव रोहिणीं धूमकेतुना ॥ ८॥

वृत्तशीले कुले जातामाचारवति धार्मिके ।
पुनः संस्कारमापन्नां जातमिव च दुष्कुले ॥ ९॥

सन्नामिव महाकीर्तिं श्रद्धामिव विमानिताम् ।
प्रज्ञामिव परिक्षीणामाशां प्रतिहताम् इव ॥ १०॥

आयतीमिव विध्वस्तामाज्ञां प्रतिहताम् इव ।
दीप्तामिव दिशं काले पूजामपहृताम् इव ॥ ११॥

पद्मिनीमिव विध्वस्तां हतशूरां चमूम् इव ।
प्रभामिव तपोध्वस्तामुपक्षीणामिवापगाम् ॥ १२॥

वेदीमिव परामृष्टां शान्तामग्निशिखाम् इव ।
पौर्णमासीमिव निशां राहुग्रस्तेन्दुमण्डलाम् ॥ १३॥

उत्कृष्टपर्णकमलां वित्रासितविहङ्गमाम् ।
हस्तिहस्तपरामृष्टामाकुलां पद्मिनीम् इव ॥ १४॥

पतिशोकातुरां शुष्कां नदीं विस्रावितम् इव ।
परया मृजया हीनां कृष्णपक्षे निशाम् इव ॥ १५॥

सुकुमारीं सुजाताङ्गीं रत्नगर्भगृहोचिताम् ।
तप्यमानामिवोष्णेन मृणालीमचिरोद्धृताम् ॥ १६॥

गृहीतामालितां स्तम्भे यूथपेन विनाकृताम् ।
निःश्वसन्तीं सुदुःखार्तां गजराजवधूम् इव ॥ १७॥

एकया दीर्घया वेण्या शोभमानामयत्नतः ।
नीलया नीरदापाये वनराज्या महीम् इव ॥ १८॥

उपवासेन शोकेन ध्यानेन च भयेन च ।
परिक्षीणां कृशां दीनामल्पाहारां तपोधनाम् ॥ १९॥

आयाचमानां दुःखार्तां प्राञ्जलिं देवताम् इव ।
भावेन रघुमुख्यस्य दशग्रीवपराभवम् ॥ २०॥

समीक्षमाणां रुदतीमनिन्दितां
सुपक्ष्मताम्रायतशुक्ललोचनाम् ।
अनुव्रतां राममतीव मैथिलीं
प्रलोभयामास वधाय रावणः ॥ २१॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made

publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com